श्रीशः शरणम् ।

अथाग्निरहस्यनामके दशमे काण्डे

विषयानुक्रमणिका प्रारभ्यते ।

इति प्रथमोऽध्यायः ।

अथ द्वितीयोऽध्यायः ।

इत्यग्निरहस्यं नाम दशमं काण्डं समाप्तम्।

इति माध्यंदिनशतपथब्राह्मणस्य पूर्वार्द्धं परिसमाप्तम्॥

श्रीशः शरणम् ।

अथैकादशे सङ्ग्रहापरपर्यायेऽष्टाध्यायीसंज्ञके काण्डे

विषयानुक्रमणिका प्रारभ्यते ।

आ०	विषयाः	पृष्ठाङ्काः

इत्यष्टमोऽध्यायः ।

इति संग्रहापरनामधेयमष्टाध्यायीनामकमेकादशं काण्डं समाप्तम् ॥

श्रीशः शरणम् ।

अथ द्वादशे मध्यम-सौत्रामण्युभयनामके काण्डे

विषयानुक्रमणिका प्रारभ्यते ।

ब्रा० विषयाः	पृष्ठाङ्काः

इति द्वितीयोऽध्यायः।

इति चतुर्थोऽध्यायः ।

अथ पञ्चमोऽध्यायः ।

इति पञ्चमोऽध्यायः ।

अथ षष्ठोऽध्यायः ।

इति षष्ठोऽध्यायः ।

इत्युत्तरक्रतुनिरूपणान्तोऽशीतिपथसंज्ञकः शतपथविभागः ।

अथ सप्तमोऽध्यायः ।

अथ नवमोऽध्यायः ।

विशेषसूचनम् ।

१ द्वादशे काण्डे तृतीयेऽध्याये चतुर्थब्राह्मणे एकादश्यां कण्डिकायां (द्विचत्वारिंशत्तमे पृष्ठे) ऋजुपा प्रथमपर्यायादग्रेतनो द्वितीयः पर्यायः "सर्वान् देवान् आत्मन्नधिषि सर्वेषु देवेषु आत्मानमधाम् ।" इत्याकारक पाठः परिच्युतः । स चात्र मुद्रितः। स तत्र मूलानुसारेणानुसन्धेय इति सप्रश्रयं सूच्यते ॥

२ द्वादशे एव काण्डेऽष्टमेऽध्याये प्रथमब्राह्मणे द्वाविंश्यां कण्डिकायां (द्वादशोत्तरशततमे पृष्ठे) ऋजुपाठेऽन्ते "भ्रत्त । इति " इत्यस्मादनन्तरं " हिरण्येन मार्जयन्ते " इत्यस्मात्प्राक् च " तत् ये एवैनमेते याजयन्ति, तानेतदाह-एतन्मयि सर्वं पचेति ।" इत्याकारकोंऽशः परिच्युतः । स चात्र मुद्रितः । स तत्र मूलानुसरेणानुसन्धेय इति सप्रश्रयं सूच्यते ॥

श्रीशः शरणम् ।

अथ त्रयोदशोऽश्वमेधसंज्ञके काण्डे

विषयानुक्रमणिका प्रारभ्यते ।

ब्रा० विषयाः	पृष्ठाङ्काः	ब्रा० विषयाः	पृष्ठाङ्काः

मूल्यार्हः प्रथमवया दक्षिणधुर्येभ्य उत्कृष्टश्रेत्यादिविशिष्टलक्षणैरुपलक्षितोऽपेक्ष्यते इति सार्थवादमभिधानं, तत्र भाल्लवेयर्षिमतेन त्वश्वः शुक्लकृष्णेति द्विरूपः कृष्णसारङ्गो वाऽपेक्ष्यते इति सकारणं सार्थवादमभिधानं, तथा सात्ययज्ञिमतेन त्वश्वः पूर्वार्द्धे कृष्णोऽपरार्द्धे शुक्लः पुरस्ताल्ललाटे कृत्तिकाञ्जिरित्येवं त्रिरूपोऽपेक्ष्यते इति सकारणं सार्थवादमभिधानं, दिग्विजयार्थं विसृष्टस्याश्वस्य पुरस्तात्समन्ततश्च शतं कवचिनो राजपुत्राः- शतं निषङ्गिणो राजन्याः—शतमिषुधिणः सूतग्रामणीपुत्राः—शतं दण्डिनः क्षात्त्रसङ्ग्रहीतॄणां पुत्राः निरमगं निरष्टमश्वशतं च रक्षितृत्वेन नियुञ्ज्यादिति विधानम्।

सावित्रीष्टिः—तत्र प्रथमायां प्रसवितृगुणकाय सवित्रे द्वादशकपालं पुरोडाशं निर्वपेदिति सार्थवादं प्रथमायाः सावित्रीष्टेर्विधानम्, तस्या एतस्याः प्रथमायाः सावित्रीष्टेः पञ्चदश सामिधेन्यः—वार्त्रघ्नावाज्यभागौ—उपांशुहविषो याज्याऽनुवाक्ययोर्मन्त्रप्रतीके विराजौ संयाज्ये शतमानं सुवर्णं हिरण्यं दक्षिणा चेतिकर्तव्यताविशेषस्य सार्थवादं विधानम्, तथैतस्यामिष्टौ प्रयाजेषु तायमानेषु वीणागाथी कश्चनार्त्विग्भिन्नो ब्राह्मणो दक्षिणत उपविश्योत्तरमन्द्रया वीणया स्वयंकृता राजकर्तृकयागदानेतिहासविशिष्टास्तिस्रो गाथा गायतीति विधानम्, आसवितृगुणकाय सवित्रे द्वादशकपालं पुरोडाशं निर्वपेदिति सार्थवादं द्वितीयायाः सावित्रीष्टेर्विधानम्, तस्या एतस्या द्वितीयायाः सावित्रीष्टेः सप्तदश सामिधेन्यः सद्वन्तावाज्यभागौ—, उपांशुहविषो याज्याऽनुवाक्ययोर्मन्त्रप्रतीके अनुष्टुभौ संयाज्ये—शतमानं रजतं हिरण्यं दक्षिणा चेतिकर्तव्यताविशेषस्य सार्थवादं विधानम्, पूर्वेष्टिवत्प्रयाजेषु तायमानेषु वीणागाथी कश्चनार्त्विग्भिन्नो ब्राह्मणो दक्षिणत उपविश्योत्तरमन्द्रया वीणया स्वयङ्कृता राजकर्तृकयागदानेतिहासविशिष्टास्तिस्रो गाथा गायतीति विधानम्, सत्यप्रसवगुणकाय सवित्रे द्वादशकपालं पुरोडाशं निर्वपेदिति सार्थवादं तृतीयायाः सावित्रीष्टेर्विधानम्, तस्या एतस्यास्तृतीयायाः सावित्रीष्टेः सप्तदश सामिधेन्यः रयिमन्तावाज्यभागौ उपांशुहविषो याज्यानुवाक्ययोर्मन्त्रप्रतीके नित्ये संयाज्ये शतमानं सुवर्णं हिरण्यं दक्षिणा चेतिकर्तव्यताविशेषस्य सार्थवादं विधानम्, पूर्वेष्टिवत्प्रयाजेषु तायमानेषु वीणागाथी कश्चनार्त्विग्भिन्नो ब्राह्मणो दक्षिणत उपविश्योत्तरमन्द्रया वीणया स्वयङ्कृता राजकर्तृकयागदानेतिहासविशिष्टास्तिस्रो गाथा गायतीति विधानम्, तृतीयायां सावित्रीष्ट्यां संस्थितायामध्वर्युयजमानावुत्थायाश्वस्य दक्षिणे कर्णे "विभूर्मात्रा प्रभूः पित्रा" इतीमानि यजूंष्याजपतो जपोत्तरञ्चैनमश्वमुत्तरपूर्वस्यां दिशि प्रसृजतश्चेति सार्थवादं विधानं, ततोऽश्वस्य रक्षिणः प्रति सप्रकारकं मन्त्रेण रक्षणविषयकमादेशकरणविधानम्, तत्र संवत्सरात्मके प्रवासेऽश्वस्याश्वरक्षकाणां च खादनपानानिवासजयसम्पादनादिकाया दिनचर्यायाः

इति पुरुषमेधः ।

इति षष्ठोऽध्यायः ।

अथ सप्तमोऽध्यायः ।

ग्रा० विषयाः	पृष्ठाङ्काः	ग्रा० विषयाः	पृष्ठाङ्काः

इत्यादि सकारणं सार्थवादमभिधानं, पञ्चमदिवस आश्वमेधिको मध्यमः पञ्चमो दिवसो भवति मेध्यमतश्व-मालभंते इति सप्रयोजनं प्रतिपादनं, षष्ठो दिवसः पौरुषमेधिको मध्यमे दिवसो भवति तत्र मेध्यान्पुरुषानाल-भते इति सप्रयोजनमभिधानं, सप्तमदिवसोऽप्तोर्यामात्मको भवतीति सप्रयोजनं तद्वतेतिकर्तव्यताविशेष-सहितं सार्थवादं निरूपणम्, अष्टम-दिवसस्त्रिणवस्तोमको भवतीति सार्थ-वादमभिधानं, नवमदिवसस्त्रयस्त्रिंशस्तो-मको भवतीति सार्थवादमभिधानं, दशम-दिवसो विश्वजित्सर्वपृष्ठोऽतिरात्रो भव-तीति सकारणं सार्थवादमभिधानं, विजयमध्यात्प्राच्यादिक्रमेण चतुर्दिक्षु यदुत्पन्नं द्रव्यं तत्तेनैव क्रमेण होतृ-ब्रह्माध्वर्यूद्गातृभ्यः प्रदेयं सभूमिपुरुषं ब्राह्मणस्ववर्जं यथा भवेत्तथेति दक्षिणा-दानविधानं, भौवनस्य विश्वकर्मणो राज्ञो दृष्टान्तेन सर्वमेधेन यष्टुः सर्व-मेधं वेदितुश्चातिष्ठारूपं फलं भवतीति प्रतिपादनम्, एतं विश्वकर्माणं राजानं कश्यपो याजयाञ्चकार तस्मिन्सर्व-मेधे यदा च विश्वकर्मा अस्मै कश्य-पाय भूमिं दातुं प्रवृत्तस्तदा "न मां कश्चन मर्त्यः कदाऽपि दातुमर्हति, हे! विश्वकर्मस्त्वं मन्दोऽसि, यदि बलान्मां दास्यसि तर्ह्यहं सलिले मग्ना भविष्यामि ततश्च ते प्रतिज्ञा वृथा स्यात्" इत्या-द्यर्थकं श्लोकं भूमिर्जगाविति निरूपणं चेत्यादि. १३८–१४३

इति सर्वमेधः।

इति सप्तमोऽध्यायः।

अथ अष्टमोऽध्यायः।

१ **पितृमेधः**—तत्र च प्रथमं सप्रयोजनं श्मशानकरणं श्मशानशब्दनिर्वचनं च, एष च पितृमेधः क्षिप्रं न कर्तव्यः किन्तु पितुः संवत्सरास्मृतौ कर्तव्य इति सकारणं निरूपणं, बहुकालाति-क्रमणोत्तरमपि पितुर्मरणसंवत्सरस्य स्मृतौ सत्यां समेषु संवत्सरेषु—अस्मृतौ च सत्यामयुग्मेषु संवत्सरेषु पितृमेधः कार्य इति व्यवस्थितविकल्पपुरःसरमभिधानं, तद्वदयं पितृमेधः एकतारके नक्षत्रे—ऽथवाऽमावास्यारूपे एकनक्षत्रे कर्तव्य इति सोपपत्तिकं सप्रयोजनं निरूपणं, तत्राप्ययं पितृमेधः शरदि माघे निदाघे वा कार्य इति सकारणं प्रति-पादनं, पूर्वं श्मशानकरणं विहितमिदानीं तच्छ्मशानं चतुर्दिक्षु चतुःस्रक्ति कर्तव्य-मिति देवासुरस्पर्द्धाया इतिहासद्वारा प्रकथनं, प्रसङ्गाद्दैव्यः प्रजा देवानुका-रेण श्मशानं चतुःस्रक्ति कुर्वन्त्यासुर्यः प्रजा असुरानुकारेण परिमण्डलाकारं श्मशानं कुर्वन्तीति प्रतिपादनम्, एतच्च श्मशानं ग्रामादक्षिणपूर्वस्यां दिशि कर्तव्य-मिति सकारणमभिधानं, ततः श्मशान-करणार्थं भूमिजोषणोपक्रमणं, तथा चैतच्छ्मशानमुदीचीनप्रवणं कर्तव्य-मिति सोपपत्तिकं सार्थवादं विधानं, तत्र दक्षिणाप्रवणं कार्यमिति सकारणं केषाञ्चिन्मतमनूद्य तस्यानिष्टफलप्रदर्शन-द्वारा निराकरणं, दक्षिणाप्रवणस्य प्रत्यासन्नं कुर्यादिति सकारणं पुनः केषाञ्चिन्मतमनूद्य तस्योदक्प्रवणत्व-सम्पादनेनैव प्रत्युच्छ्रितं दक्षिणदेशे भव-

श्रा० विषयाः	पृष्ठाङ्काः
कर्तव्यमिति सकारणं प्रदर्श्य वपनसाधनमन्त्रं च प्रदर्श्य तस्याभिप्रायवर्णनं, ततः सूर्योदयसमकालं कृष्टक्षेत्रमध्ये प्रेतास्थिनिवपनस्य सार्थवादं विधानं, विहिते प्रेतास्थिनिवपने मन्त्रद्वयं विनियुज्य तयोरभिप्रायार्थप्रदर्शनं द्वितीयमन्त्रेऽसौस्थाने नामादेशकरणकथनं च, दक्षिणां दिशं गत्वाऽनुच्छ्वसन्कुम्भं प्रक्षिप्यानपेक्षमाण एहीति कञ्चित्पुरुषं प्रेष्येदिति विधाय यथाप्रेषितं कृत्वा तस्मिन्प्रत्यागते "परं मृत्यो" इतीमं मन्त्रं जपेदिति विधाय च तस्य मन्त्रस्याभिप्रायप्रदर्शनं, कृष्टक्षेत्रमध्ये निहितानामस्थ्नां यथाङ्ग परिकल्पनं कुर्यादिति विधाय तत्र मन्त्रद्वयं विनियुज्य तस्याभिप्रायप्रदर्शनम्, ततस्त्रयोदश पादमात्र्य इष्टका लेखारूपलक्षणवर्जिता भवन्ति—या एवाग्निक्यः पादमात्र्य इष्टकास्ताः—एवैताः अग्निकीरिष्टका यजुषोपदधातीमाश्च तूष्णीमुपदधातीति च सार्थवादं सकारणं प्रतिपादनं, तासां विहितानां पादमात्रीणां त्रयोदशानामिष्टकानां कृष्टक्षेत्रमध्ये उपधानप्रकारनिरूपणम्—उपधानद्वाराऽग्निचित्यात्मकत्वसम्पादनं च, प्रदरात्पुरीषाहरणप्रैषप्रदर्शनं, तत्रैकेषां मतेन प्रदरात्पुरीषमाहृत्य पुनरन्येषां मतेन पूर्वदक्षिणावान्तरदेशे कर्षूं खात्वा ततः पुरीषमभ्याहृत्याभ्याहृत्येति पक्षद्वयस्येच्छाविकल्पत्वप्रदर्शनपुरःसरं तेन पुरीषेण दक्षिणतः पश्चादुत्तरतश्च श्मशानकरणविधानं, तच्च पुरीषश्मशानं महन्न कुर्यात्किन्तु क्षत्रियस्योद्बाहुपुरुषसम्मितं—ब्राह्मणस्य मुखदघ्नं—स्त्रिया उपस्थदघ्नं—शूद्रस्याष्ठीवदघ्नं कुर्यादिति सार्थवादं विधानम्, अथवा पुरीषश्मशानं सर्वेषामधोजानुसम्मितं कर्तव्यमिति विधानं, तयाऽपरस्मा अवकाशं न दद्यादिति विधानं, ततस्तस्य क्रियमाणस्य तेजनीमुत्तरतो धारयन्तीति सार्थवादं विधानम्, उत्तरतो धृतां तेजनीं न न्यस्येत्किन्त्वेनां धृत्वा वोढ्वा वा गृहेपूच्छ्रयेदिति सार्थवादं विधानं, तत्र पुरीषश्मशाने यवानामावापं कृत्वा तदवकाभिः कुशैश्च प्रच्छादयेदिति सप्रयोजनं विधानं चेत्यादि.	१५९–१६०
४ पुरस्तात्पालाशेन शङ्कुना—उत्तरतः शमीमयेन शङ्कुना—पश्चाद्वारणेन शङ्कुना—दक्षिणतोऽश्ममयेन शङ्कुना एवं चतुर्भिः शङ्कुभिरेनच्छ्मशानं परिणिहन्तीति सप्रयोजनमभिधानं, श्मशानस्य दक्षिणतः कर्षूं खात्वा तां क्षीरोदकाभ्यामापूर्योत्तरतश्च सप्त कर्षूः खात्वा ता उदकेनैवापूरयेदिति सप्रयोजनमभिधानं, ततोऽध्वर्युयजमानामात्या उत्तरासु कर्षूषु प्रतिकर्षु त्रींस्त्रीनश्मन आवपन्तीति विधाय तासां कर्षूणामुपरिष्टाद्ग्रामं प्रत्युद्गच्छन्तीति समन्त्रकं विधानं, हस्तगृहीतैरपामार्गैः स्वशरीरमपमृजत इति समन्त्रकं सप्रयोजनं विधानं, ततो यत्रोदकं भवति तत्र स्नात्वा "सुमित्रिया नः" इति मन्त्रेणापोऽञ्जलिनाऽऽदायेति सार्थवादं विधाय "दुर्मित्रियाः" इति मन्त्रेण यो ग्रामस्य दिशं द्वेष्यः स्यात्तमुद्दिश्य तां दिशं परासिञ्चेदिति सप्रयोजनं विधानं, स्नानार्थो आपो यदि स्थावरास्तर्हि पापानामनिरसनं, यदि च ताः प्रवहन्त्यस्तदा पापानामपि निरसनमिति स्नानार्थोना-	

इति पितृमेधः ।

इत्यष्टमोऽध्यायः ।

इति परिशेषाख्ये भागे त्रयोदशोऽश्वमेधकाण्डे विषयानुक्रमणिका समाप्ता ।



श्रीशः शरणम् ।

अथोत्तराख्ये भागे बृहदारण्यकसंज्ञकचतुर्दश-काण्डान्तर्गते प्रवर्ग्यकाण्डे

विषयानुक्रमणिका प्रारभ्यते ।

श्रा० विषयाः	पृष्ठाङ्काः
मर्शनविधानं, महावीरादिनिर्माणाय देवयजनस्योत्तरतः परिश्रितं विधाय तत्र सम्भृतसम्भारानादाय गच्छन्तः " प्रैतु ब्रह्मणस्पतिः " इतीमं मन्त्रं जपन्तीति च विधाय तस्य मन्त्रस्य व्याख्यानम्, उत्तरतो विहितं परिश्रित-मनूद्य तस्योपपादनम्, एवमानीतं सम्भार-जातं तस्मिन्परिश्रिते खरे निदध्या-दिति स्तावकार्थवादातिदेशसहितं सम-न्त्रकं विधानं, तेषां कृष्णाजिनस्थानां सम्भाराणां स्तावकार्थवादातिदेशसहितं समन्त्रकं संसर्जनविधानं, तया संसृ-ष्टया मृदा महावीरकरणस्य विशिष्ट-लक्षणाभिधानपुरःसरं विधानम्,एवमुक्त-लक्षणसम्पन्नं महावीरं कृत्वा तस्य समन्त्रकमभिमर्शनविधानम्, एतत्प्रकारेणै-वान्यावपि द्वौ महावीरौ कर्तव्यावित्य-भिधायैतयैव मृदा द्वयोः पिन्वनयोर्द्वयो रौहिणकपालयोश्च तूष्णींकरणविधानं, यदेतत्समन्त्रकं महावीरनिर्माणममन्त्रकं पिन्वनादिनिर्माणं चोक्तं तदुभयस्यापि संहत्य प्रशंसनम्, अवशिष्टस्य मृत्पिण्ड-स्य परित्यागप्रसक्तिं वारयित्वा प्रायश्चि-त्तार्थं धारणविधानं, प्रथममहावीरस्य समन्त्रकं स्तावकार्थवादातिदेशसहित-मितरयोर्महावीरयोः पिन्वनयो रौहिण-कपालयोश्चामन्त्रकं गवेधुकाभिः श्लक्ष्णी-करणविधानं, प्रथममहावीरस्य समन्त्रकं सार्थवादं स्तावकार्थवादातिदेशसहितं चेतरयोर्महावीरयोः पिन्वनयो रौहिण-कपालयोश्चामन्त्रकमश्वशकृता धूपनकरण-विधानम्, एतेषां महावीरादीनां श्रपणं विधाय पचनद्रव्याणां विधानम्, विहिते पचने पचनप्रकारकथनपूर्वकं मन्त्रं विनियुज्य तत्स्तावकार्थवादातिदेशकथनम्, इतर-योर्महावीरयोः पिन्वनयो रौहिणकपाल-योश्च प्रथममहावीरवच्छ्रपणस्यामन्त्रकं विधानम्, एतेषामावापोद्धरणयोः काल-विशेषस्य निरूपणं, महावीरत्रयस्यो-द्वपने क्रमेण मन्त्रत्रयं विनियुज्योद्वपन-क्रियायां मन्त्रसङ्गतेरुपपादनं, पिन्वनयो रौहिणकपालयोश्च तूष्णीमुद्वपनविधानं, प्रथममहावीरस्यावापादुद्धृतस्याजाक्षीरे-णासेचनस्य समन्त्रकं तत्स्तावकार्थ-वादातिदेशसहितं विधानम्, आवापादुद्धृत-योरितरयोर्महावीरयोः पिन्वनयो रौहिण-कपालयोश्च तूष्णीमजाक्षीरेणासेचनस्य विधानं, प्रथमप्रवर्ग्यसृष्टिप्रतिपादक-ब्राह्मणस्यावसाने निरूपिताया व्रत-चर्याया अत्राप्यतिदेशकरणं चेत्यादि.	१९–३२
३ घर्मसन्दीपनं ब्राह्मणम्—तत्र प्रथमं अस्य च प्रवर्ग्यस्यानारभ्याधीतत्वेन स्वातन्त्र्यमाशंक्य क्रतुप्रवेशस्य प्रति-पादनं, तत्र सप्रवर्ग्ये क्रतौ आतिथ्ये-ष्ट्यनंतरमुपसदः पुरा प्रवर्ग्यानुष्ठानकाल इति प्रतिपादनं, ततस्तावदसंस्कृतानां पात्राणां यागानर्हत्वात्तत्संस्काराय द्वन्द्वशः पात्रासादनस्य सार्थवादं विधानं, ततोऽध्वर्युः प्रोक्षणीः संस्कृत्या-दायोपोत्तिष्ठन् " ब्रह्मन्प्रचरिष्यामः होत-रभिष्टुहि " इति प्रैषद्वयं ब्रूयादिति विधाय तस्य प्रैषद्वयस्याभिप्रायकथनम्, एवमध्वर्युणा प्रार्थितस्य होतुरभिष्टवस्य प्रतिपदं, तात्पर्यार्थकथनपुरःसरं तत्सा-धनभूतकर्सङ्घगतप्रथमर्चः प्रतीकप्रद-र्शनेनाभिधानं, स्तावकार्थवादातिदेश-सहितमासादितानां पात्राणां प्रोक्षणविधानं,	

ब्रा० विषयाः	पृष्ठाङ्काः	ब्रा० विषयाः	पृष्ठाङ्काः

विनियोजनं, ततोऽस्य घर्मयागस्य वषट्काराप्रदानत्वात्प्रसक्तायाः पुरोऽनुवाक्याया निषेधप्रदर्शनं, महावीरस्थेन हविषा वषट्कृते होमस्य विधानं, विहिते होमे मन्त्रं विनियुज्य तस्य स्वाहाकारार्थवादसहितं व्याख्यानं, होमानन्तरं त्रिवारं महावीरस्याग्नेरूर्ध्वाभिमुखमुज्ज्वालनं समंत्रकं विधाय तन्मंत्रस्य व्याख्यानम्, अनुवषट्कारे च समन्त्रकं होमं विधाय तन्मन्त्रस्य तात्पर्यार्थविवरणं, सप्रयोजनं ब्रह्मकर्तृकघर्मानुमन्त्रणमन्त्रं विधाय तस्य भागशोऽनूद्य व्याख्यानं, सोपपत्तिकं यजमानस्यापि घर्मानुमन्त्रणमन्त्रं विधाय तस्य भागशोऽनूद्य व्याख्यानम्, एवं वषट्काराऽनुवषट्कारयोर्महावीरस्थं हविर्हुत्वा तत्र यदवशिष्टं तेन प्रतिदिशमध्वर्युणा पिन्वने क्रियमाणे यजमानकर्तृकं घर्मपिन्वमानानुमन्त्रणमन्त्रं विधाय तस्य भागशोऽनूद्य व्याख्यानं, यजमानफलार्थं प्रथममूर्ध्वं पश्चात्प्रागादिदिक्षु च देवपितृतृप्त्यर्थं पिन्वनं कुर्यादित्यर्थवादेनोन्नयनम्, एवं कुर्वतो दक्षिणतोऽवस्थितस्याध्वर्योः प्रत्याक्रमणविधानं, विहिते प्रत्याक्रमणे कर्तव्यप्रकारं मन्त्रं चाभिधाय तत्र मन्त्रस्य तात्पर्यार्थं प्रदर्श्य च प्रवर्ग्ये तत्सङ्गतेरुपपादनम्, एवमुत्तरपूर्वार्द्धेऽतिक्रम्याहवनीयस्योत्तरस्यां दिशि सिकतयोप्ते स्थले महावीरस्य समन्त्रकं सादनं विधाय तस्य मन्त्रस्य व्याख्यानं, सप्तभिर्मन्त्रैः सप्त विकङ्कतशकलान्घर्मे न्यज्य जुहोति हुत्वा हुत्वा प्रथमपरिधौ हस्तलेपं निर्मार्ष्टीति च सार्थवादं विधानम्, एतेषां सप्तानामपि शाकलमन्त्राणां मध्ये प्रथममन्त्रस्य पूषपरत्वं व्याख्याय द्वितीयतृतीयपञ्चमषष्ठशाकलमन्त्राणां प्राणपरत्वव्याख्यानं, तथा चतुर्थशाकलमन्त्रेण चतुर्थशकलं घर्मे न्यज्याग्नावहुतं सन्तं वेद्यामास्तीर्णे बर्हिषि दक्षिणभागे स्वयमुदीचीं दिशमीक्षमाणः संवृणुयादिति सार्थवादं सविशेषं विधानं, सप्तमशाकलमन्त्रेण तु सप्तमस्य शकलस्य होमं निषिध्य सप्रकारकं सोपपत्तिकं निरसनविधानम्, एताः सप्त शाकलाहुतीः संहत्य तासां प्रशंसनं, महावीरे वर्तमानस्यावशिष्टस्य हविष उपयमन्यामासेचनस्य मन्त्रतदभिप्रायसहितं स्तावकार्थवादातिदेशसहितं च विधानं, सायंप्रातःकालयोः प्रवृञ्जनोपरिष्टात्काले होतव्यत्वेन विहितौ यौ रौहिणपुरोडाशौ तावस्मिन्काले होतव्याविति समन्त्रकं स्तावकार्थवादातिदेशसहितं च विधानम्, उपयमन्यामानीतस्यावशिष्टस्य घर्मस्य यजमानेन सहोपहवयाचनपूर्वकं मन्त्रतदर्थसहितं भक्षणविधानम्, स्तावकार्थवादातिदेशसहितं प्राग्वंशस्य दक्षिणादिग्भागे प्रवर्ग्यकर्तॄणां मार्जनविधानं, ततोऽवशिष्टानां वैकंकतशकलानां प्रहरणविधानम्, इत्थं सप्रवर्गे क्रतौ प्रवर्ग्याख्यं कर्म निर्वर्त्य तदनूपसदाख्यं कर्म कर्तव्यमित्यभिधाय प्रवर्ग्यस्य प्रयोजनकथनपूर्वकमुपसंहरणम्, इमं प्रवर्ग्यं प्रथमयज्ञे न प्रवृञ्ज्यादिति सदोषं सकारणं निषिध्य द्वितीये तृतीये वा तु यज्ञेऽमुं प्रवर्ग्यं प्रवृञ्ज्यादेवेति सोपपत्तिकं सप्रयोजनं सकारणं विपक्षे बाधककथनपुरःसरं विधानं, द्वितीयतृतीयादिष्वपि यज्ञेषु न सर्वेषां यजमानानामविशेषेणैतत्प्रवर्ग्यानुष्ठानं कर्तव्यं, किन्तु

क्रा० विषयाः	पृष्ठाङ्काः	क्रा० विषयाः	पृष्ठांङ्काः

ज्ञातप्रियानूचानानामिति सप्रयोजनमभिधानं, सहस्रदक्षिणे—सर्ववेदसे—सर्वपृष्ठे विश्वजिति—वाजपेये—राजसूये च सत्रेषु च नियमेनं प्रवृज्ज्याद्देभ्योऽन्यत्र नेति प्रतिपादनम्, एवमप्रवर्ग्यस्य यज्ञस्याशिरस्कत्वे कथमग्निहोत्रदर्शपूर्णमासचातुर्मास्यपशुबन्धसौम्याध्वराणां सशिरस्त्वमित्याशङ्क्य तदुपपादनं, प्रकारान्तरेण सशिरस्कत्वस्योपपादनम्, एतद्वेदनस्य फलाभिधानं, सोमयागाङ्गभूतेषु दीक्षणीयादिषु कर्मसु प्रणीता आपः प्रणीयन्ते तद्वत्तदङ्गभूते प्रवर्ग्येऽपि तासां प्रणयनेन भवितव्यमित्याशङ्क्य तत्समाधानकथनं, प्रयाजानुयाजानामभावकृतं यज्ञान्तरवैषम्यमाशङ्क्य तत्समाधानकथनं, यज्ञान्तरवदत्राज्यभागौ कुतो न भवत इत्याशंक्य तत्समाधानकथनं, मृन्मयपात्रस्य होमानर्हतामाशंक्य घर्महोमे तदेव योज्यमित्युपपाद्य तत्र पक्षान्तरेण वानस्पत्यं हिरण्मयं च पात्रमाक्षिप्यैतस्मिन्पक्षे बाधमुक्त्वा मृन्मयेनैव होतव्यमित्युपसंहारकरणं, प्रथमाध्यायस्थप्रथमप्रवर्ग्यसृष्टिप्रतिपादकब्राह्मणस्यावसाने निरूपिताया व्रतचर्याया अत्राप्यतिदेशकरणं चेत्यादि. ७०--९७

इति द्वितीयोऽध्यायः।

अथ तृतीयोऽध्यायः।

१ घर्मोद्वासनम्—तत्र प्रथमं घर्मोद्वासनकालस्य विधानं, तत्र प्रवर्ग्यमुद्वासयितुं घर्मोपयुक्तानां द्रव्याणामेकीकरणविधानं, ततो घर्मोद्वासस्याङ्गत्वेनाहुतित्रयस्य विधित्सया तदर्थं दर्भमुष्टित्रयस्योपकल्पननिरूपणं, तेषां मध्ये एकं दर्भमुष्टिं प्रज्वाल्य तद्गतेऽग्नौ प्रथमाहुतिर्होतव्येति सप्रकारकं सप्रयोजनं सार्थवादं समन्त्रकं विधाय तस्य मन्त्रस्य भागशोऽनूद्य व्याख्यानम्, पूर्ववद्द्वितीयाहुतेः सप्रकारकं सप्रयोजनं सार्थवादं समन्त्रकं विधानं, पूर्ववत्तृतीयाहुतेः सप्रकारकं सप्रयोजनं सार्थवादं समन्त्रकं विधानं, घर्मोद्वासनदेशं प्रति गमनं समन्त्रकं विधाय तस्य मन्त्रस्य भागशोऽनूद्य व्याख्यानम्, एवं समन्त्रकं सर्वं प्रवर्ग्यसम्भारमादायोपनिष्क्रम्य प्रस्तोतारं साम गायेति प्रेष्येदिति विधाय तत्र पक्षान्तरमुपन्यस्यास्य पक्षस्यैवान्ततः संकारणं निगमनं, सामगानस्य प्रयोजननिरूपणं, विहितस्य साम्न आधारभूतमन्त्रलिङ्गद्वारेणापि रक्षोनिबर्हकत्वाभिधानम्, तस्याः सामयोन्या ऋचोऽतिच्छन्दस्त्वेन प्रशंसनम्, तत्साम्न आद्यं स्तोभपदमुदाहृत्य रक्षोविनाशहेतुत्वप्रतिपादनम्, ततः प्रवर्ग्यमुद्वासयिष्यतामध्वर्युप्रभृतीनां गमनमार्गं विधायोदकसमीपगमनविधानम्, परितो जलयुक्ते द्वीपे घर्मोद्वासनं विधाय विपक्षे बाधोपन्यासपुरःसरं तदुपपाद्य तस्य निगमनम्, इत्थं नदीद्वीपे घर्मोत्सादनमभिधाय तत्र सोपपत्तिकं पक्षान्तरनिरूपणं, ततः प्रथमस्य महावीरस्योत्सादनप्रकारं सार्थवादं समन्त्रकं विधाय तस्य मन्त्रस्य भागशोऽनूद्य व्याख्यानम्, एवमुत्तरयोरपि महावीरयोरुत्सादनं कार्यमिति विधाय संहृत्य च तत्प्रशंसनं, ततो या पूर्वं महावीरादिनिर्माणावसरेऽवशिष्टा मृन्निहिताऽऽस्ते तस्या अप्यत्र निधानं विधाय तस्य सोपपत्तिकं प्रशंसनं, ततः क्रमेण

इति तृतीयोऽध्यायः ।

इति बृहदारण्यकसंज्ञकचतुर्दशकाण्डान्तर्गते प्रवर्ग्यकाण्डे.

विषयानुक्रमणिका समाप्ता ।

समाप्तं प्रवर्ग्यकाण्डम् ।